॥ श्रीः ॥

# ॥ करुणा लहरी ॥

विषीदता नाथ विषानलोपमे विषादभूमौ भवसागरे विभो! ।
परं प्रतीकारमपश्यताधुना मयायमात्मा भवते निवेदितः ॥ १

भवानलज्वालविलुप्तचेतनः शरण्य! तेऽङ्घ्रिं शरणं भयादयाम् ।
विभाव्य भूयोऽपि दयासुधाम्बुधे! विधेहि मे नाथ मया
यथेच्छसि ॥ २

विहाय संसारमहामरुस्थलीमलीकदेहादिमिलन्मरीचिकाम् ।
कृपातरङ्गाकुलमन्मनोमृगो विगाढुमीश! त्वयि गाढमीहते ॥ ३

त्वदङ्घ्रिफुल्लाम्बुजमध्यनिर्गलन्मरन्दनिःस्यन्दनितान्तलम्पटः ।
मनोमिलिन्दो मम मुक्तचापलस्त्वदन्यमीशान! तृणायमन्यते ॥ ४

जगत्त्रयत्राणविधौ धृतव्रतं तवाङ्घ्रिराजीवमपास्य ये जनाः ।
शरण्यमन्यन् मृगयन्ति यान्ति ते नितान्तमीशान!
कृतान्तदेहलीम् ॥ ५

रमामुखाम्भोजविकासनक्षमो जगत्त्रयोद्बोधविधानदीक्षितः ।
कदा मदज्ञानविभावरीं हरे! हरिष्यति त्वन्नयनारुणोदयः ॥ ६

सुरासुरस्वान्तचकोरचुम्बिता समस्तसन्तापचयापनोदिनी ।
महानिशीथे मम मानसे कदा स्फुरिष्यति त्वन्मुखचन्द्रचन्द्रिका ॥

सुयौवनापाण्डुरगण्डमण्डलप्रतिस्फुरत्कुण्डलताण्डवाद्भुतम् ।
गदाग्रज त्वन्मुखफुल्लपङ्कजं कदा मदक्ष्णोरतिथीभविष्यति ॥ ८

सुरापगातुङ्गतरङ्गचालितां सुरासुरानीकललाटलालिताम् ।
कदा दधे देव! दयामृतोदधे! भवत्पदाम्भोरुहधूलिधोरणीम् ॥ ९

महाजवाश्छिन्नविवेकरश्मयो मदोद्धता देव! मदक्षवाजिनः ।
हरे! समासाद्य तवाङ्घ्रिमन्दुरामपास्तवेगा दधतां सुशीलताम् ॥ १०

पुरातनानां वचसामगोचरं महेशितारं पुरुषोत्तमं पतिम् ।
अपास्य तं त्वां निरपत्रपा सती सती मतिर्मे कथमन्यमेष्यति ॥ ११

न जाग्रता स्वप्नगतेन वा भयात्समीहितं ते करुणालवादृते ।
गिरं मदीयां यदि वेत्सि तात्त्विकीं तदा जगन्नायक!
मामुरीकुरु ॥ १२

अयि दीनतरं दयानिधे! दुरवस्थं सकलैः समुज्झितम् ।
अधुनापि न मां निभालयन् भजसे हा कथमश्मचित्तताम् ॥ १३

सुमहन्ति जगन्ति बिभ्रतस्तव यो नाविरभून् मनागपि ।
स कथं परमाप्त! देहिनां परमाणोर्मम धारणे श्रमः ॥ १४

नितरां विनयेन पृच्छते सुविचार्योत्तरमत्र यच्छ मे ।
करितो गिरितोऽप्यहं गुरुस्त्वरितो नोद्धरसे यदद्य माम् ॥ १५

न धनं न च राज्यसंपदं न हि विद्यामिदमेकमर्थये ।
मयि धेहि मनागपि प्रभो करुणाभङ्गितरङ्गितां दृशम् ॥ १६

अयमत्यधमोऽपि निर्गुणो दयनीयो भवता दयानिधे ।
वमतां फणिनां विषानलं किमु नानन्दयिता हि चन्दनः ॥ १७

क्षुधितस्य नहि त्रपास्ति मे प्रतिरथ्यं प्रतिगृह्णतः कणान् ।
अकलङ्क यशस्करं न ते भवदीयोऽपि यदन्यमृच्छति ॥ १८

नितरां तरकेऽपि सीदतः किमु हीनं गलितत्रपस्य मे ।
भगवन्! कुरुसूक्ष्ममीक्षणां परतस्त्वां जनता किमालपेत् ॥ १९

नरके निजकर्मकल्पिता भजतो मे महतीरपि व्यथाः ।
इदमेकमसह्यमीक्षका यदनाथं निगदन्ति मां विभो ॥ २०

मृगदन्तिमुखान् मया सह प्रतिरुद्धान् भवजालबन्धने ।
तव मामपहाय मुञ्चतः करुणा किं न भिनत्ति मानसम् ॥ २१

निरुपाधिजनार्तिहारिणं भगवंस्त्वामवगत्य तत्त्वतः ।
कृतपुण्यचयावहेलनं कथमब्जेक्षण! मामुपेक्षसे ॥ २२

सततं निगमेषु शृण्वता वरद! त्वां पतितानुपावनम् ।
पुरु पापमुपास्यतेऽनिशं त्वयि विश्वासधिया मया विभो! ॥ २३

सुकृतं न कृतं पुरा कदाप्यथ सर्वं कृतमेव दुष्कृतम् ।
अधुना गलितह्रिया मया भगवंस्त्वां प्रति किं निगद्यताम् ॥ २४

मदकामविमोहमत्सरा रिपवस्त्वत्पुर एव तावकम् ।
धृतशार्ङ्गगदारिनन्दक! प्रतिकर्षन्ति कथं न वीक्षसे ॥ २५

अपि गर्तमुखे गतः शिशुः पथिकेनापि निवार्यते जवात् ।
जनकेन पतन् भवार्णवे न निवार्यो भवता कथं विभो ॥ २६

सुकृतप्रिय! मान्यथास्तु ते सुकृतिभ्यः सुखदस्य सुप्रता ।
अपि पापमबिभ्रतस्तु मां तव विश्वम्भर नाम दुर्लभम् ॥ २७

वचनैः परुषैरिह प्रभो! यदि रोषं समुपागतोऽसि मे ।
मुखरं कृतकोटिकल्मषं करुणाब्धे! जगतोऽपसारय ॥ २८

यदि वीक्ष्य ददासि सत्कृतिं न मयैव प्रतिगृह्यते तदा ।
अथ चेत् निजमाशयं प्रभो! परितुष्टः शिरसा वहामि तत् ॥२९

पतितोऽप्यतिदुर्गतोऽपि सन्नकृतज्ञो निखिलागसां पदम् ।
भवदीय इतीरयंस्त्वया दयनीयस्त्रपयैव केवलम् ॥ ३०

सुकृतप्रकृतौ जने त्वया कृतया किं कृपया कृपानिधे! ।
यदि मादृशि सा विधीयते तव कीर्तिर्वद कीदृशी तदा ॥ ३१

अयि शैशवलालितः शिशुः प्रतिबद्धो जनकेन ताड्यते ।
न कदापि च लालितस्त्वया किमु ताड्यो भगवन्!
कुकर्मिभिः ॥ ३२

अहमेव हि दोषदूषितो भगवंस्त्वां समुपालभे मुधा ।
रमणोविरहज्वलज्वलन्नमृतांशुं कुमतिर्विनिंदति ॥ ३३

करुणाकर! दुर्दशाकुलं पतितालम्बन! पापपञ्जरम् ।
अमृताम्बुनिधे! महाज्वरं नहि जह्या जगदीश! जातु माम् ॥ ३४

कटुजल्पनमल्पकस्य मे नहि ते कल्पयतु क्रुधं विभो !
कुपितातुरबालभाषितं किमु गृह्णन्ति मनाङ् महाशयाः ॥ ३५

भुजगाहितकल्पितध्वज स्फुरदाशाभुजगालिवेल्लितम् ।
जटिलज्वरकुञ्जराङ्कुश ज्वरजुष्टं न जहीहि जातु माम् ॥ ३६

न वदामि न दुष्कृतं मया कृतमित्युक्तिमिमां तु मे शृणु ।
मम भीतिमनोनशद् विभो! पतितोद्धारक नाम तावकम् ॥ ३७

अपि शर्वपितामहादिभिर्भजनीयः पुरुषोत्तमो हि यः ।
तमुपालभमानमुद्धतं धिगिमं मां धिगिमां धियं मम ॥ ३८

अथ सर्वमिदं मयोज्झितं भवतोऽन्यन् नहि किञ्चिदर्थये ।
मम मानसगोचरीभवत्वरविन्दाक्ष! तवाद्भुतं वपुः ॥ ३९

हरिनीलमयावनीतले वरवृन्दाविपिने विलासिनि ।
मणिमण्डपमध्यविस्फुरद्विबुधक्ष्मारुहमूलमाश्रितम् ॥ ४०

शिखिपिच्छमहामणिस्फुरन्मुकुटाकुञ्चितकान्तकुन्तलम् ।
कमनीयतरालकावलिभ्रमणाभ्राजिललाटसुन्दरम् ॥ ४१

शरदिंदुसहोदराननं दलदम्भोजपलाशलोचनम् ।
अरुणाधरकान्तिदन्तुरस्फुटदन्तांशुविकासिताम्बरम् ॥ ४२

दरपाण्डुरगण्डमण्डलप्रतिसर्पत्कमनीयकुण्डलम् ।
मणिमौक्तिकमञ्जुमञ्जरीमहनीयद्युतिरञ्जितश्रुति ॥ ४३

पृथुवर्तुलमौक्तिकावलीसुषमावेल्लितकान्तकन्धरम् ।
हरिनीलगिरिद्युतिद्रुहा कमलामन्दिरवक्षसाञ्चितम् ॥ ४४

चरणाब्जनखावलम्बिनीं भुजगाकारभुजान्तरागताम् ।
निबिडाभ्रमिव क्षणप्रभां बहुदुत्फुल्लवनामलस्रजम् ॥ ४५

मणिकङ्कणकान्तिमांसलं दरफुल्लाम्बुजसुन्दरद्युति ।
पतितोद्धरणे दृढव्रतं कमनीयं करयोर्युगं दधत् ॥ ४६

वररत्नमयाङ्गुलीयकावलिशोभामिलिताङ्गुलीगणैः ।
मुहुराकुलितेन वेणुना वशयत् प्राणभृतां मनःश्रुतिः ॥ ४७

उदरद्युतिनिम्नगोच्छलल्लहरीरूपकरोमराजिकम् ।
पशुपालविलासिनीलसन् नयनाकर्षणनाभिनिम्नितम् ॥ ४८

कनकद्रवगौरमम्बरं दधतोरुद्वितयेन सुन्दरम् ।
उदयन्मणिनूपुरप्रभासरणिश्रेणिजटालजानुकम् ॥ ४९

अरिगीर्णगजेन्द्रगोपने दधता जाङ्घिकतामलौकिकीम् ।
त्रिजगन्महनीयमूर्तिना वरजङ्घायुगलेन शोभितम् ॥ ५०

कुलिशाङ्कुशकम्बुसाम्बुजध्वजचक्राद्यभिरामलक्ष्मणा ।
अरुणारुणकोमलत्विषा कमनीयेन तलेन राजितम् ॥ ५१

विधिशर्वमुखामरस्फुरन्मुकुटोन्निद्रमणिप्रभाकुलम् ।
नखचन्द्रमयूखमूर्च्छिताखिलतापं पदयोर्युगं दधत् ॥ ५२

सरतः सरणौ सतो बहिः स्वपतो वालपतो गृहान्तरे ।
वपुरीदृशमीश तावकं हृदयालम्बनमस्तु मे सदा ॥ ५३

नवनीरदनीलिमद्युतिर्नमनीयो निगमैर्निरन्तरम् ।
निरये निपतन्तमाशु मां नयनेनापि सनाथयेद् विभुः ॥ ५४

प्रणिपत्य विधे भवन्तमद्धाविनिबद्धाञ्जलिरेकमेव याचे ।
जनुरस्तु कुले कृषीवलानामपि गोविन्दपदारविन्दभाजाम् ॥ ५५

इति पण्डितजगन्नाथविरचितं करुणालहरीस्तोत्रं सम्पूर्णम् ॥

